শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগারুডে মহাপুরাণে পূর্ৱখণ্ডে প্রথমাংশাখ্যে আচারকাণ্ডে

# ॥ শ্রীৱিষ্ণুপঞ্জরস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীৱিষ্ণুপঞ্জরস্তোত্রম্ ॥

হরিরুৱাচ
প্রৱক্ষ্যাম্যধুনা হ্যেতদ্বৈষ্ণৱং পঞ্জরং শুভম্।
নমো নমস্তে গোৱিন্দ চক্রং গৃহ্য সুদর্শনম্।
প্রাচ্যাং রক্ষস্ব মাং ৱিষ্ণো ৎৱামহং শরণং গতঃ॥ **1** ॥

গদাং কৌমোদকীং গৃহ্ণ পদ্মনাভ নমোঽস্তু তে।
যাম্যাং রক্ষস্ব মাং ৱিষ্ণো ৎৱামহং শরণং গতঃ॥ **2** ॥

হলমাদায সৌনন্দং নমস্তে পুরুষোত্তম।
প্রতীচ্যাং রক্ষ মাং ৱিষ্ণো ৎৱামহং শরণং গতঃ॥ **3** ॥

মুসলং শাতনং গৃহ্য পুণ্ডরীকাক্ষ রক্ষ মাম্।
উত্তরস্যাং জগন্নাথ ভৱন্তং শরণং গতঃ॥ **4** ॥

খড্গমাদায চর্মাথ অস্ত্রশস্ত্রাদিকং হরে।
নমস্তে রক্ষ রক্ষোঘ্ন ঐশান্যাং শরণং গতঃ॥ **5** ॥

পাঞ্চজন্যং মহাশঙ্খমনুদ্বোধঞ্চ পঙ্কজম্।
প্রগৃহ্য রক্ষ মাং ৱিষ্ণো আগ্নেয্যাং রক্ষ সূকর॥ **6** ॥

চন্দ্রসূর্যং সমাগৃহ্য খড্গং চান্দ্রমসং তথা।
নৈরৃত্যাং মাং চ রক্ষস্ব দিৱ্যমূর্তে নৃকেসরিন্॥ **7** ॥

ৱৈজযন্তীং সম্প্রগৃহ্য শ্রীৱৎসং কণ্ঠভূষণম্।
ৱাযৱ্যাং রক্ষ মাং দেৱ হযগ্রীৱ নমোঽস্তু তে॥ **8** ॥

ৱৈনতেযং সমারুহ্য ৎৱন্তরিক্ষে জনার্দন।
মাঞ্চ রক্ষাজিত সদা নমস্তেঽস্ত্ৱপরাজিত॥ **9**॥

ৱিশালাক্ষং সমারুহ্য রক্ষ মাং ৎৱং রসাতলে।
অকূপার নমস্তুভ্যং মহামীন নমোঽস্তু তে॥ **10**॥

করশীর্ষাদ্যঙ্গুলীষু সত্য ৎৱং বাহুপঞ্জরম্।
কৃৎৱা রক্ষস্ৱ মাং ৱিষ্ণো নমস্তে পুরুষোত্তম॥ **11**॥

এৱমুক্তং শঙ্করায ৱৈষ্ণৱং পঞ্জরং মহৎ।
পুরা রক্ষার্থমীশান্যাঃ কাত্যাযন্যা ৱৃষধ্ৱজ॥ **12**॥

নাশযামাস সা যেন চামরং মহিষাসুরম্।
দানৱং রক্তৱীজঞ্চ অন্যাংশ্চ সুরকণ্টকান্।
এতজ্জপন্নরো ভক্ত্যা শত্রূন্ৱিজযতে সদা॥ **13**॥

॥ ইতি শ্রীৱিষ্ণুপঞ্জরস্তোত্রং সমাপ্তম্॥